# अध्यायः ३

# कर्मयोगः

**अवतरणिकाभाष्यम्**

शास्त्रस्य प्रवृत्ति-निवृत्ति-विषय-भूते द्वे बुद्धी भगवता निर्दिष्टे। सांख्ये बुद्धिर्योगे बुद्धिरिति च।

तत्र प्रजहाति यदा कामान् (गी २.५५) इत्यारभ्य आ अध्याय-परिसमाप्तेः साङ्ख्य-बुद्ध्याश्रितानां संन्यासं कर्त्तव्यमुक्त्वा तेषां तन्निष्ठतयैव च कृतार्थतोक्ता एषा ब्राह्मी स्थितिः (गी २.७२) इति। अर्जुनाय च कर्मण्येवाधिकारस्ते (गी २.४७) मा ते सङ्गोऽस्त्वकर्मणि (गी २.४७) इति कर्मैव कर्त्तव्यमुक्तवान् योग-बुद्धिमाश्रित्य, न तत एव श्रेयःप्राप्तिमुक्तवान्। तदेतदालक्ष्य पर्याकुलीभूत-बुद्धिः अर्जुन उवाच।।

कथं भक्ताय श्रेयोर्थिने यत् साक्षाच्छ्रेयः-साधनं साङ्ख्य-बुद्धि-निष्ठां श्रावयित्वा मां कर्मणि दृष्टानेकानर्थ-युक्ते पारम्पर्येणाप्यनैकान्तिक-श्रेयः-प्राप्ति-फले नियुञ्ज्यात् इति युक्तः पर्याकुलीभावोऽर्जुनस्य। तदनुरूपश्च प्रश्नः ज्यायसी चेत् (गी ३.१) इत्यादिः। प्रश्नापाकरण-वाक्यं च भगवतोक्तं यथोक्त-विभाग-विषये शास्त्रे।।

केचित्तु अर्जुनस्य प्रश्नार्थमन्यथा कल्पयित्वा तत्प्रतिकूलं भगवतः प्रतिवचनं वर्णयन्ति। यथा चाऽऽत्मना सम्बन्ध-ग्रन्थे गीतार्थो निरूपितः तत्प्रतिकूलं चेह पुनः प्रश्न-प्रतिवचनयोरर्थं निरूपयन्ति। कथम् तत्र सम्बन्ध-ग्रन्थे तावत् सर्वेषामाश्रमिणां ज्ञान-कर्मणोः समुच्चयो गीताशास्त्रे निरूपितोऽर्थ इत्युक्तम्।

पुनर्विशेषितं च यावज्जीव-श्रुति-चोदितानि[1] कर्माणि परित्यज्य केवलादेव ज्ञानान्मोक्षः प्राप्यत इत्येतदेकान्तेनैव प्रतिषिद्धमिति।

इह त्वाश्रम-विकल्पं दर्शयता यावज्जीव-श्रुति-चोदितानामेव कर्मणां परित्याग उक्तः।

तत् कथमीदृशं विरुद्धमर्थमर्जुनाय ब्रूयाद्भगवान्, श्रोता वा कथं विरुद्धमर्थमवधारयेत्

तत्रैतत् स्यात् - गृहस्थानामेव श्रौत-कर्म-परित्यागेन केवलादेव ज्ञानान्मोक्षः प्रतिषिध्यते,

न त्वाश्रमान्तराणामिति। एतदपि पूर्वोत्तर-विरुद्धमेव।

कथम् सर्वाश्रमिणां ज्ञान-कर्मणोः समुच्चयो गीताशास्त्रे निश्चितोऽर्थ इति प्रतिज्ञायेह कथं तद्विरुद्धं केवलादेव ज्ञानान्मोक्षं ब्रूयादाश्रमान्तराणाम्।।

[1] यावज्जीवं श्रुतिचोदितानि इति पाठान्तरम्।

अथ मतं - श्रौत-कर्मापेक्षयैतद्वचनं केवलादेव ज्ञानाच्छ्रौत-कर्म-रहितात् गृहस्थानां मोक्षः प्रतिषिध्यते

इति।

तत्र गृहस्थानां विद्यमानमपि स्मार्त्तं कर्म अविद्यमानवदुपेक्ष्य ज्ञानादेव केवलादित्युच्यत इति।

एतदपि विरुद्धम्।

कथम्   गृहस्थस्यैव स्मार्त्त-कर्मणा समुच्चिदाद् ज्ञानान्मोक्षः प्रतिषिध्यते, न त्वाश्रमान्तराणामिति कथं

विवेकिभिः शक्यम् अवधारयितुम्।

किञ्च यदि मोक्ष-साधनत्वेन स्मार्त्तानि कर्माण्यूर्ध्व-रेतसां समुच्चीयन्ते, तथा गृहस्थस्यापीष्यतां स्मार्त्तैरेव

समुच्चयो न श्रौतैः।।

अथ श्रौतैः स्मार्तैश्च गृहस्थस्यैव समुच्चयो मोक्षाय, ऊर्ध्व-रेतसां तु स्मार्त्त-कर्म-मात्र-समुच्चिताद्

ज्ञानान्मोक्ष इति।

तत्रैवं सति गृहस्थस्यायास-बाहुल्याच्छ्रौतं स्मार्त्तं च बहु-दुःख-रूपं कर्म शिरस्यारोपितं स्यात्।।

अथ गृहस्थस्यैवायास-बाहुल्य-कारणान्मोक्षः स्यान्नाश्रमान्तराणां श्रौत-नित्य-कर्म-रहितत्वादिति।

तदप्यसत्। सर्वोपनिषत्सु इतिहास-पुराण-योग-शास्त्रेषु च ज्ञानाङ्गत्वेन मुमुक्षोः सर्व-कर्म-संन्यास-

विधानात्, आश्रम-विकल्प-समुच्चय-विधानाच्च श्रुति-स्मृत्योः।।

आक्षेपः सिद्धः तर्हि सर्वाश्रमिणां ज्ञान-कर्मणोः समुच्चयः।

समाधानम् न। मुमुक्षोः सर्व-कर्म-संन्यास-विधानात्।

व्युत्थायाथ भिक्षाचर्यं चरन्ति (बृ. ३.५.१) तस्मान्न्यासमेषां तपसाम् अतिरिक्तमाहुः (म.ना. ४.७९)

न्यास एवात्यरेचयत्  (म.ना. ४.७८) इति। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः

(कै १.२, म.ना. ४.१२) इति च। ब्रह्मचर्यादेव प्रव्रजेत् (जाबा. ४) इत्याद्याः श्रुतयः।

त्यज धर्ममधर्मं च उभे सत्यानृते त्यज। उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज (म.भा.शां

३२९.४०, ३३१.४४)। संसारमेव निःसारं दृष्ट्वा सार-दिदृक्षया।

प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः (ना.परि. ३.१५) इति बृहस्पतिः।

कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते। तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः (म.भा.शां

२४१.७) इति शुकानुशासनम्।

इहापि च सर्वकर्माणि मनसा संन्यस्य (गी ५.१३) इत्यादि।

मोक्षस्य चाकार्यत्वाद् मुमुक्षोः कर्मानर्थक्यम्।।

आक्षेपः नित्यानि प्रत्यवाय-परिहारार्थमनुष्ठेयानि इति चेत्।

समाधानम् न। असंन्यासि-विषयत्वात् प्रत्यवाय-प्राप्तेः।

न ह्यग्निकार्याद्यकरणात् संन्यासिनः प्रत्यवायः कल्पयितुं शक्यो यथा ब्रह्मचारिणाम् असंन्यासिनामपि

कर्मिणाम्[2]।

न तावन्नित्यानां कर्मणामभावादेव भाव-रूपस्य प्रत्यवायस्योत्पत्तिः कल्पयितुं शक्या युक्ता च।

कथमसतः सज्जायेत (छा ६.२.२) इत्यसतः सज्जन्मासम्भव-श्रुतेः।

---

[2] अग्निहोत्रस्य दारपरिग्रह-समकाल-प्राप्तत्वान्नास्ति असंन्यासिनामपि ब्रह्मचारिणामग्निहोत्रविधिः। विध्यभावान्नास्ति प्रत्यवायः। तद्विध्यभावस्य तुल्यत्वात् संन्यासिनामपि नित्याकरणान्न प्रत्यवायः।

यदि विहिताकरणादसम्भाव्यमपि प्रत्यवायं ब्रूयाद्वेदः तदाऽनर्थकरो वेदोऽप्रमाणमित्युक्तं स्यात्।

विहितस्य करणाकरणयोर्दुःख-मात्र-फलत्वात्[3]।

तथा च कारकं शास्त्रं न ज्ञापकमिति[4] अनुपपन्नार्थं कल्पितं स्यात्।

न चैतदिष्टम्।

तस्मान्न संन्यासिनां कर्माणि। अतो ज्ञानकर्मणोः समुच्चयानुपपत्तिः।।

ज्यायसी चेत्कर्मणस्ते मता बुद्धिः (गी ३.१) इत्यर्जुनस्य प्रश्नानुपपत्तेश्च।

यदि हि भगवता द्वितीयाध्याये ज्ञानं कर्म च समुच्चयेन त्वयैवानुष्ठेयम् इत्युक्तं स्यात्, ततोऽर्जुनस्य

प्रश्नोऽनुपपन्नः ज्यायसी चेत्कर्मणस्ते मता बुद्धिः इति।

---

[3] विहितकरणस्य श्रमहेतुत्वेन दुःखहेतुत्वम्। विहिताकरणस्य प्रत्यवायहेतुत्वेन दुःखहेतुत्वम्।

[4] ज्ञापकम्कारकम्प्रामाण्यत्वम्मानान्तराबाधितम्।

अर्जुनाय चेत् बुद्धि-कर्मणी त्वयानुष्ठेये इत्युक्ते, या कर्मणो ज्यायसी बुद्धिः साऽपि उक्तैवेति तत् किं

कर्मणि घोरे मां नियोजयसि केशव (गी ३.१) इति प्रश्नो न कथञ्चनोपपद्यते।

न चार्जुनस्यैव ज्यायसी बुद्धिर्नानुष्ठेया इति भगवतोक्तं पूर्वमिति कल्पयितुं युक्तं, येन ज्यायसी चेत्

इति प्रश्नः स्यात्।।

यदि पुनरेकस्य पुरुषस्य ज्ञान-कर्मणोर्विरोधाद् युगपदनुष्ठानं न सम्भवतीति भिन्न-पुरुषानुष्ठेयत्वं

भगवता पूर्वमुक्तं स्यात् ततोऽयं प्रश्न उपपन्नो ज्यायसी चेत्इत्यादिः।

अविवेकतः प्रश्न-कल्पनायामपि भिन्न-पुरुषानुष्ठेयत्वेन[5] भगवतः प्रतिवचनं नोपपद्यते।

न चाज्ञान-निमित्तं भगवत्प्रतिवचनं कल्प्यम्।

---

[5] ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनामिति।

अस्माच्च भिन्न-पुरुषानुष्ठेयत्वेन ज्ञान-कर्म-निष्ठयोर्भगवतः प्रतिवचन-दर्शनाद् ज्ञान-कर्मणोः

समुच्चयानुप-पत्तिः। तस्मात् केवलादेव ज्ञानान्मोक्षः इत्येषोऽर्थो निश्चितो गीतासु सर्वोपनिषत्सु च।

ज्ञान-कर्मणोः एकं वद निश्चित्य इति चैकविषयैव प्रार्थनाऽनुपपन्ना, उभयोः समुच्चय-सम्भवे।

कुरु कर्मैव तस्मात्त्वम् (गी ४.१५) इति च ज्ञान-निष्ठाऽसम्भवमर्जुनस्यावधारणेन दर्शयिष्यति।।

**अर्जुन उवाच -**

**ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन।**

**तत्किं कर्मणि घोरे मां नियोजयसि केशव।। १।।**

अर्जुन उवाच - जनार्दन केशव कर्मणः बुद्धिः ज्यायसी (इति) ते मता चेत् (तर्हि) (त्वम्) तत् घोरे कर्मणि मां किं नियोजयसि ।। १

व्याकरण - प्रशस्य ईयसुन्। ज्यायस्। स्त्री - ज्यायसी। ✓अर्द् गतौ याचने च भ्वादि प.प. सेट् जनमर्दति गच्छति इति जनार्दन, सर्वान्तरः इत्यर्थः ।

ज्यायसी चेदिति। ज्यायसी श्रेयसी चेत् यदि कर्मणः सकाशात् ते तव मता अभिप्रेता बुद्धिः ज्ञानं हे जनार्दन। यदि बुद्धि-कर्मणी समुच्चिते इष्टे तदा एकं श्रेयःसाधनम् इति कर्मणः ज्यायसी बुद्धिः इति कर्मणोऽतिरिक्तकरणं बुद्धेरनुपपन्नमर्जुनेन कृतं स्यात्। न हि तदेव तस्मात् फलतोऽतिरिक्तं स्यात्[6]।

[6] समुच्चितस्य कर्मबुद्ध्योः पृथक्त्वमुत्कर्षापकर्षौ वा न स्याताम्। तस्मात् समुच्चयेऽपि कर्मातिरिक्ता बुद्धिरित्यनुपपन्ना।

तथा च कर्मणः श्रेयस्करी भगवतोक्ता बुद्धिः, अश्रेयस्करञ्च कर्म कुर्विति मां प्रतिपादयति, तत् किं नु कारणम् इति भगवत उपालम्भमिव कुर्वन् तत् किं कस्मात् कर्मणि घोरे क्रूरे हिंसा-लक्षणे मां नियोजयसि केशव इति च यदाह तच्च नोपपद्यते।

अथ च स्मार्त्तेनैव कर्मणा समुच्चयः सर्वेषां भगवतोक्तोऽर्जुनेन चावधारितश्चेत्, तत्किं कर्मणि घोरे मां नियोजयसि इत्यादि कथं युक्तं स्याद्वचनम्।। १ ।।

किञ्च -

**व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे।**

**तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्।। २।।**

व्यामिश्रेण वाक्येन इव मे बुद्धिं मोहयसि इव । तद्-एकं निश्चित्य वद येन अहम् श्रेयः आप्नुयाम्।। २

व्याकरण - ✓आप्लृ व्याप्तौ स्वादि ५ प.प. अनिट् उत्तमपुरुष ए.व। ✓मिश्र सम्पर्के to mix, mindlge चुरादि उ.प . सेट् with वि and आ।

व्यामिश्रेण इव वाक्येन मे बुद्धिम् मोहयसि इव तद्-एकम् निश्चित्य वद येन अहम् श्रेयः आप्नुयाम्

व्यामिश्रेणेति। व्यामिश्रेण इव यद्यपि विविक्ताभिधायी भगवान् तथापि मम मन्द-बुद्धेर्व्यामिश्रम् इव

भगवद्वाक्यं प्रतिभाति।

तेन मम बुद्धिं मोहयसि इव। मम बुद्धेः व्यामोहापनयाय हि प्रवृत्तस्त्वं तु कथं मोहयसि।

अतो ब्रवीमि बुद्धिं मोहयसीव मे ममेति।

तत्र भिन्न-कर्तृकयोर्ज्ञान-कर्मणोरेक-पुरुषानुष्ठानासम्भवं यदि मन्यसे तत्रैवं सति तत् तयोः एकं बुद्धिं कर्म वा इदमेवार्जुनस्य योग्यं स्व-बुद्धि-शक्त्यवस्थानुरूपम् इति निश्चित्य वद ब्रूहि। येन ज्ञानेन कर्मणा वान्यतरेण श्रेयोऽहम् आप्नुयां प्राप्नुयाम्।

यदि इह कर्म-निष्ठायां गुण-भूतमपि ज्ञानं भगवतोक्तं स्यात्, तत्कथं तयोरेकं वद इत्येक-विषयैवार्जुनस्य शुश्रूषा स्यात्।

न हि भगवतोक्तं पूर्वम् अन्यतरदेव ज्ञान-कर्मणोर्वक्ष्यामि नैव द्वयम् इति, येनोभय-प्राप्त्यसम्भवमात्मनो मन्वान एकमेव प्रार्थयेत्।। २ ।।

प्रश्नानुरूपमेव प्रतिवचनं श्रीभगवानुवाच -

**श्री भगवानुवाच -**

**लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।**

**ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्।। ३।।**

श्री भगवनुवाच - अनघ अस्मिन् लोके सांख्यानां ज्ञानयोगेन योगिनाम् कर्मयोगेन द्विविधा निष्ठा मया पुरा प्रोक्ता ।। ३

व्याकरण - नि + ✓ष्ठा गतिनिवृत्तौ भ्वादि १ प.प. अनिट् + अङ् टाप्। द्विविधा ब.व्रीहि । ज्ञानमेव योगः ज्ञानयोगः।

लोकेऽस्मिन् इति। लोकेऽस्मिन् शास्त्रार्थानुष्ठानाधिकृतानां त्रैवर्णिकानां द्विविधा द्वि-प्रकारा निष्ठा स्थितिरनुष्ठेय-तात्पर्यं पुरा पूर्वं सर्गादौ प्रजाः सृष्ट्वा तासामभ्युदय-निःश्रेयस-प्राप्ति-साधनं वेदार्थ-सम्प्रदायमाविष्कुर्वता प्रोक्ता मया सर्वज्ञेनेश्वरेण हे अनघ अपाप।

तत्र का सा द्विविधा निष्ठेत्याह - ज्ञानयोगेन ज्ञानमेव योगस्तेन साङ्ख्यानाम्[7] आत्मानात्म-विषय-विवेक-विज्ञानवतां ब्रह्मचर्याश्रमादेव कृत-संन्यासानां वेदान्त-विज्ञान-सुनिश्चितार्थानां परमहंस-परिव्राजकानां ब्रह्मण्येवावस्थितानां निष्ठा प्रोक्ता।

कर्मयोगेन कर्मैव योगः कर्म-योगः तेन योगिनां कर्मिणां निष्ठा प्रोक्तेत्यर्थः।।

यदि चैकेन पुरुषेणैकस्मै पुरुषार्थाय ज्ञानं कर्म च समुच्चित्यानुष्ठेयं भगवतेष्टमुक्तं वक्ष्यमाणं वा गीतासु, वेदेषु चोक्तं, कथमिहार्जुनायोपसन्नाय प्रियाय विशिष्ट-भिन्न-पुरुष-कर्तृके एव ज्ञान-कर्म-निष्ठे ब्रूयात्।

---

[7] सम्यक् ख्यायते सा वैदिकी सम्यग्बुद्धिः सङ्ख्या। तया प्रकाश्यत्वेन सम्बन्धि तत्त्वं साङ्ख्यम्। आ० गि०।।
तद्विषया बुद्धिः साङ्ख्यबुद्धिः। सा साङ्ख्यबुद्धिः येषां ज्ञानिनाम् उचिता भवति ते साङ्ख्याः। शा० भाष्०।।

यदि पुनः अर्जुनो ज्ञानं कर्म च द्वयं श्रुत्वा स्वयमेव अनुष्ठास्यति[8] अन्येषां तु भिन्न-पुरुषानुष्ठेयतां वक्ष्यामि इति मतं भगवतः कल्प्येत, तदा राग-द्वेषवान् अप्रमाणभूतो भगवान् कल्पितः स्यात्।

तच्चायुक्तम्।

तस्मात् कयापि युक्त्या न समुच्चयो ज्ञान-कर्मणोः।

यदर्जुनेनोक्तं कर्मणो ज्यायस्त्वं बुद्धेः, तच्च स्थितम् अनिराकरणात्।

तस्याश्च ज्ञान-निष्ठायाः संन्यासिनामेवानुष्ठेयत्वं भिन्न-पुरुषानुष्ठेयत्व-वचनाच्च।

भगवत एवमेवानुमतमिति गम्यते।। ३ ।।

---

[8] समुच्चित्य।

मां च बन्धकारणे कर्मणि एव नियोजयसि इति विषण्णमनसम् अर्जुनं कर्म न आरभे इति एवं मन्वानम् आलक्ष्य आह भगवान् - न कर्मणामनारम्भात् इति।

अथ वा ज्ञानकर्मनिष्ठयोः परस्परविरोधात् एकेन पुरुषेण युगपद् अनुष्ठातुमशक्यत्वे सति इतरेतरानपेक्षयोः एव पुरषार्थहेतुत्वे प्राप्ते - कर्मनिष्ठायाः ज्ञाननिष्ठाप्राप्तिहेतुत्वेन पुरषार्थहेतुत्वं न स्वातन्त्र्येण, ज्ञाननिष्ठा तु कर्मनिष्ठा-उपायलब्धात्मिका सती स्वातन्त्र्येण पुरुषार्थहेतुः अन्यानपेक्षा इति एतमर्थं प्रदर्शयिष्यन् आह भगवान् -

**न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।**

**न च संन्यसनादेव सिद्धिं समधिगच्छति।। ४।।**

कर्मणाम् अनारम्भाद् पुरुषः नैष्कर्म्यं न अश्नुते। संन्यसनादेव सिद्धिं च न समधिगच्छति।। ४

व्याकरण - अनारम्भात् - न.तत्पुरुष । निष्कर्मन् + ष्यञ्। ✓अशूङ् व्याप्तौ संघाते च स्वादि आ.प. सेट् (अश भोजने क्र्यादि प.प.)

**पुरुषः कर्मणाम् अनारम्भात् नैष्कर्म्यम् न अश्नुतेच सन्न्यसनात् एव सिद्धिम् न समधिगच्छति**

न कर्मणामिति। न कर्मणामनारम्भाद् अप्रारम्भात्कर्मणां क्रियाणां — यज्ञादीनामिह जन्मनि जन्मान्तरे

वा अनुष्ठितानामुपात्त-दुरित-क्षय-हेतुत्वेन सत्व-शुद्धि-कारणानां तत्कारणत्वेन च ज्ञानोत्पत्ति-द्वारेण

ज्ञान-निष्ठा-हेतूनाम्। ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः।

यथा आदर्श-तल-प्रख्ये पश्यत्यात्मानमात्मनि (म.भा.शां २०४.८) इत्यादि-स्मरणात् — अनारम्भाद्

अननुष्ठानात्। नैष्कर्म्यं निष्कर्म-भावं कर्म-शून्यतां ज्ञान-योगेन निष्ठां निष्क्रियात्म-

स्वरूपेणैवावस्थानमिति यावत्। पुरुषः न अश्नुते न प्राप्नोतीत्यर्थः। कर्मणामनारम्भाद् नैष्कर्म्यं

नाश्नुते इति वचनात् तद्विपर्ययात् तेषामारम्भाद् नैष्कर्म्यम् अश्नुते इति गम्यते।।

कस्मात् पुनः कारणात् कर्मणामनारम्भाद् नैष्कर्म्यं नाश्नुत इति। उच्यते - कर्मारम्भस्यैव नैष्कर्म्योपायत्वात्। न हि उपायमन्तरेण उपेय-प्राप्तिरस्ति।

कर्मयोगोपायत्वं च नैष्कर्म्य-लक्षणस्य ज्ञान-योगस्य श्रुतौ, इह च, प्रतिपादनात्।

श्रुतौ तावत् प्रकृतस्य आत्मलोकस्य वेद्यस्य[9] वेदनोपायत्वेन तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन (बृ. ४.४.२२) इत्यादिना कर्म-योगस्य ज्ञान-योगोपायत्वं प्रतिपादितम्।

इहापि च - संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः (गी ५.६), योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्म-शुद्धये (गी ५.११), यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् (गी १८.५) इत्यादि

[9] न तु प्राप्यस्य।

प्रतिपादयिष्यति।।

ननु च अभयं सर्व-भूतेभ्यो दत्वा नैष्कर्म्यम् आचरेत्(ना.परि. ४.१३) इत्यादौ कर्त्तव्य-कर्म-संन्यासादपि नैष्कर्म्य-प्राप्तिं दर्शयति।

लोके च कर्मणामनारम्भाद् नैष्कर्म्यम् इति प्रसिद्धतरम्। अतश्च नैष्कर्म्यार्थिनः किं कर्मारम्भेणेति प्राप्तम्। अत आह - न च संन्यसनादेवेति।

न अपि संन्यसनादेव केवलात्कर्म-परित्याग-मात्रादेव ज्ञान-रहितात् सिद्धिं नैष्कर्म्य-लक्षणां ज्ञान-योगेन निष्ठां समधिगच्छति न प्राप्नोति।। ४ ।।

त्यज धर्ममधर्मं च उभे सत्यानृते त्यज।
उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज।।

कस्मात् पुनः कारणात् कर्मसंन्यासमात्रादेव ज्ञानरहिताद् सिद्धिं नैष्कर्म्यलक्षणां पुरुषः नाधिगच्छति

इति हेत्वाकाङ्क्षायामाह -

**न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।**

**कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः।। ५।।**

हि कश्चित् क्षणमपि जातु अकर्मकृत् न तिष्ठति। हि सर्वः अवशः (सन्) प्रकृतिजैर्गुणैः कर्म (प्रति) कार्यते (कर्म कर्त्तुं प्रेर्यते) ।।

व्याकरण - ✓कृ करणे तनादि उ.प अनिट् + णिच् (कर्मवाच्य - कराया जाता)

न हीति। न हि यस्मात् क्षणमपि कालं जातु कदाचित् कश्चित् तिष्ठति अकर्मकृत् सन्।

कस्मात् कार्यते हि यस्माद् अवशः एव कर्म सर्वः प्राणी प्रकृतिजैः प्रकृतितो जातैः सत्त्व-रजस्-

तमोभिः गुणैः।

अज्ञ इति वाक्य-शेषो यतो वक्ष्यति गुणैर्यो न विचाल्यते (गी १४.२३) इति।

साङ्ख्यानां पृथक्करणाद् (गी ३.३) अज्ञानामेव हि कर्मयोगो न ज्ञानिनाम्। ज्ञानिनां तु गुणैरचाल्यमानानां स्वतश्चलनाभावात् कर्मयोगो नोपपद्यते। तथा च व्याख्यातं वेदाविनाशिनम्(गी २.२१) इत्यत्र।। ५ ।।

यस्तु अनात्मज्ञश्चोदितं कर्म नारभते इति तदसदेवेत्याह -

**कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।**

**इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते।। ६ ।।**

यः विमूढात्मा कर्मेन्द्रियाणि संयम्य इन्द्रियार्थान् मनसा स्मरन् आस्ते सः मिथ्याचारः उच्यते।। ६

व्याकरण - ✓यम उपरमे भ्वादि प.प अनिट् + नि ल्यबन्त। मिथ्याचारः ब.व्रीहि (मिथ्या आचारः यस्य सः)

कर्मेन्द्रियाणीति। कर्मेन्द्रियाणि हस्तादीनि संयम्य संहृत्य य आस्ते तिष्ठति मनसा स्मरन् चिन्तयन्

इन्द्रियार्थान् विषयान् विमूढात्मा विमूढान्तःकरणः मिथ्याचारः मृषाचारः पापाचारः स उच्यते।। ६ ।।

**यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन।**

**कर्मेन्द्रियैः कर्मयोगं असक्तः स विशिष्यते।। ७।।**

अर्जुन यः तु इन्द्रियाणि मनसा नियम्य असक्तः (सन्) कर्मेन्द्रियैः कर्मयोगं आरभते सः विशिष्यते। ७

व्याकरण - ✓शिष्लृ विशेषणे रुधादि प.प अनिट् + वि

यस्त्विति। यः तु पुनः कर्मण्यधिकृतोऽज्ञो बुद्धि-इन्द्रियाणि मनसा नियम्य आरभतेऽर्जुन कर्मेन्द्रियैः वाक्पाण्यादिभिः। किमारभते इत्याह - कर्मयोगम् असक्तः सन् स विशिष्यते इतरस्माद् मिथ्याचारात्।। ७ ।।

यत एवमतः -

**नियतं कुरु कर्म त्वं कर्म ज्यायोह्यकर्मणः।**

**शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।। ८।।**

त्वं नियतं कुरु कर्म हि अकर्मणः कर्म ज्यायः । अकर्मणः ते शरीरयात्रा अपि न च प्रसिद्ध्येद ।। ८

व्याकरण - ✓सिध् दिवादि प.प अनिट् + प्र (विधिलिङ्)

नियतमिति। नियतं नित्यं शास्त्रोपदिष्टं यो यस्मिन् कर्मण्यधिकृतः फलाय चाश्रुतं तन्नियतं कर्म तत्

कुरु त्वं हेऽर्जुन। यतः कर्म ज्यायः अधिकतरं फलतः हि यस्मात् अकर्मणः अकरणादनारम्भात्।

कथम् शरीरयात्रा शरीर-स्थितिः अपि च ते तव न प्रसिद्ध्येत् प्रसिद्धिं न गच्छेद् अकर्मणः

अकरणात्।

अतो दृष्टः कर्माकर्मणोर्विशेषो लोके।। ८ ।।

यच्च मन्यसे बन्धार्थत्वात् कर्म न कर्त्तव्यमिति तदप्यसत्, कथम् -

**यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।**

**तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर।। ९।।**

अयं लोकः यज्ञार्थात् कर्मणः अन्यत्र (अधिकृतः) (कर्मकृत्) कर्मबन्धनः (भवति)। कौन्तेय मुक्तसङ्गः (सन्) तदर्थं कर्म समाचर।। ९

यज्ञार्थादिति। यज्ञो वै विष्णुः (तै.सं. १.७.४) इति श्रुतेर्यज्ञ ईश्वरः तदर्थं यत्क्रियते तद्यज्ञार्थं कर्म

तस्मात् यज्ञार्थात् कर्मणोऽन्यत्र अन्येन कर्मणा लोकोऽयम् अधिकृतः कर्मकृत् कर्मबन्धनः कर्म

बन्धनं यस्य सोऽयं कर्मबन्धनो लोकः, न तु यज्ञार्थात्।

अतः तदर्थं यज्ञार्थं कर्म कौन्तेय मुक्तसङ्गः कर्म-फल-सङ्ग-वर्जितः सन् समाचर निर्वर्त्तय।। ९ ।।

इतश्च अधिकृतेन कर्म कर्त्तव्यं -

**सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।**

**अनेन प्रसविष्यध्वं एष वोऽस्त्विष्टकामधुक्।। १०।।**

पुरा प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा अनेन प्रसविष्यध्वम् एष वः इष्टकामधुक् अस्तु (इति) उवाच। १०

व्याकरण - प्र ✓षूङ् दिवादि प्राणिप्रसवे आ.प सेट् + प्र (आशीर्लिङ्) आर्षप्रयोग

सहेति। सहयज्ञाः यज्ञ-सहिताः प्रजाः त्रयो वर्णाः ताः सृष्ट्वा उत्पाद्य पुरा पूर्वं सर्गादौ उवाच उक्तवान् प्रजापतिः प्रजानां स्रष्टा। अनेन यज्ञेन प्रसविष्यध्वं प्रसवो वृद्धिरुत्पत्तिः तां कुरुध्वम्। एषः यज्ञः वः युष्माकम् अस्तु भवतु इष्टकामधुक् इष्टानभिप्रेतान् कामान् फल-विशेषान् दोग्धीति इष्टकामधुक्।। १० ।।

कथम् -

**देवान् भावयतानेन ते देवा भावयन्तु वः।**

**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ।। ११।।**

अनेन देवान् भावयत। ते देवाः  वः भावयन्तु। परस्परं भावयन्तः परम् श्रेयः अवाप्स्यथ।। ११

देवानिति। देवान् इन्द्रादीन् भावयत वर्धयत अनेन यज्ञेन ते देवाः वर्धिताः[10] भावयन्तु आप्यायन्तु[11] वृष्ट्यादिना वः युष्मान्। एवं परस्परम् अन्योन्यं भावयन्तः श्रेयः परमपि[12] ज्ञान-प्राप्ति-क्रमेण अवाप्स्यथ स्वर्गं वा परं श्रेयोऽवाऽवाप्स्यथ।। ११ ।।

---

[10] अयं क्वचिन्न दृश्यते।

[11] आप्याययन्तु इति वा।

[12] मोक्षलक्षणं ज्ञान-प्राप्ति-क्रमेण इति पाठान्तरम्।

किञ्च -

**इष्टान् भोगान् हि वो देवाः दास्यन्ते यज्ञभाविताः।**

**तैर्दत्तान् अप्रदायैभ्यः यो भुंक्ते स्तेन एव सः।। १२।।**

हि देवाः यज्ञभाविताः (सन्तः) इष्टान् भोगान् वः दास्यन्ते। यः तैः दत्तान् (भोगान्) एभ्यः अप्रदाय भुंक्ते सः स्तेनः एव । १२

इष्टानिति। इष्टान् अभिप्रेतान् भोगान् हि वो युष्मभ्यं देवाः दास्यन्ते वितरिष्यन्ति स्त्री-पशु-पुत्रादीन् यज्ञभाविताः यज्ञैर्वर्धिताः, तोषिता इत्यर्थः। तैः देवैः दत्तान् भोगान् अप्रदाय अदत्त्वा, आनृण्यमकृत्वेत्यर्थः एभ्यः देवेभ्यः यो भुंक्ते स्व-देहेन्द्रियाण्येव तर्पयति स्तेन एव तस्कर एव सः देवादि-स्वापहारी।। १२ ।।

ये पुनः -

**यज्ञशिष्टाशिनस्सन्तः मुच्यन्ते सर्वकिल्बिषैः।**

**भुञ्जते ते त्वघं पापाः ये पचन्त्यात्मकारणात्।। १३।।**

यज्ञशिष्टाशिनः सन्तः सर्वकिल्बिषैः मुच्यन्ते। ये आत्मकारणात् पचन्ति ते पापाः तु अघं भुञ्जते।। १३

यज्ञेति। देव-यज्ञादीन् निर्वर्त्य तच्छिष्टमशनममृताख्यमशितुं शीलं येषां ते यज्ञशिष्टाशिनः सन्तः मुच्यन्ते सर्वकिल्बिषैः सर्वैः पापैश्चुल्यादि-पञ्च-सूनाख्यैः प्रमाद-कृत-हिंसादि-जनितैश्चान्यैः। तद्यथा - कुट्टनी[13] पेषणी चुल्ली उदकुम्भी च मार्जनी। पञ्चसूना गृहस्थस्य ताभिस्स्वर्गं न गच्छति (मनु. २.६७-७३)। ये त्वात्मम्भराः[14] भुञ्जते ते त्वघं पापं स्वयमपि पापाः ये पचन्ति पाकं निर्वर्त्तयन्ति आत्मकारणात् आत्म-हेतोः।। १३ ।।

---

13 कुट्टनी उलूखले धान्यं निक्षिप्य मुसलेनावहननसमये कीटादिनाशसम्भवाज्जन्या सूना। घरट्टोपलाभ्यां धान्यस्य पेषणसमये जाता सूना पेषणी। चुल्ल्यां काष्ठानि निक्षिप्य तत्राग्निं संयोज्य ओदानादिपचनसमये कीटादिनाशजन्या सूना चुल्ली। उदकुम्भी कुम्भेन जलाहरणसमये जाता सूना जले पादप्रवेशादिना क्षुद्रजन्तुनाशसम्भवात्। गृहभूमेर्मार्जनादिसमये जाता। (रामरायकविः)

14 आत्मंभरय इति वा। आत्मंभरा इति स्वकुक्षिंभराः इत्यर्थः।

इतश्च अधिकृतेन कर्म कर्त्तव्यम्। जगच्चक्रप्रवृत्तिहेतुः हि कर्म। कथमिति उच्यते -

**अन्नाद्भवन्ति भूतानि पर्जन्याद् अन्नसम्भवः।**

**यज्ञाद् भवति पर्जन्यः यज्ञः कर्मसमुद्भवः।। १४।।**

भूतानि अन्नाद् भवन्ति पर्जन्याद् अन्नसंभवः। पर्जन्यः यज्ञाद् भवति। यज्ञः कर्मसमुद्भवः।।

अन्नादिति। अन्नाद् भुक्ताद् लोहित-रेतः-परिणतात् प्रत्यक्षं भवन्ति जायन्ते भूतानि।

पर्जन्याद् वृष्टेः, अन्नस्य सम्भवः अन्नसम्भवः। यज्ञाद् भवति पर्जन्यः। अग्नौ प्रास्ताहुतिः सम्यग् आदित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः (मनु ३.७६) इति स्मृतेः।

यज्ञः अपूर्वं, स च यज्ञः कर्मसमुद्भवः ऋत्विग्यजमानयोश्च व्यापारः कर्म ततः समुद्भवो यस्य यज्ञस्यापूर्वस्य स यज्ञः कर्म-समुद्भवः।। १४ ।।

तच्च एवंविधं कर्म कुतो जातमित्याह -

**कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।**

**तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्।। १५।।**

कर्म ब्रह्मोद्भवं विद्धि ब्रह्म अक्षरसमुद्भवम्। तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्।। १५

कर्मेति। कर्म ब्रह्मोद्भवं ब्रह्म वेदः, स उद्भवः कारणं प्रकाशको यस्य तत्कर्म ब्रह्मोद्भवं विद्धि जानीहि। ब्रह्म पुनर्वेदाख्यम् अक्षरसमुद्भवम् अक्षरं ब्रह्म परमात्मा समुद्भवो[15] यस्य तदक्षरसमुद्भवम्। ब्रह्म वेद इत्यर्थः। यस्मात् साक्षात् परमात्माख्यादक्षरात् पुरुष-निश्वासवत् समुद्भूतं ब्रह्म तस्मात् सर्वार्थ-प्रकाशकत्वात् सर्वगतम्। सर्वगतमपि सन् नित्यं सदा यज्ञ-विधि-प्रधानत्वाद् यज्ञे प्रतिष्ठितम्।। १५ ।।

[15] सम्यगुद्भवत्यस्मादिति। कारणमित्यर्थः।

**एवं प्रवर्त्तितं चक्रं नानुवर्त्तयतीह यः।**

**अघायुरिन्द्रियारामः मोघं पार्थ स जीवति।। १६।।**

इह एवं (ईश्वरेण) प्रवर्त्तितं चक्रं यः न अनुवर्त्तयति पार्थ अघायुरिन्द्रियारामः स मोघं जीवति।।

एवमिति। एवम् इत्थम् ईश्वरेण वेद-यज्ञ-पूर्वकं जगत्-चक्रं प्रवर्तितं नानुवर्त्तयति इह लोके यः कर्मण्यधिकृतः सन् अघायुः अघं पापम् आयुर्जीवनं यस्य सोऽघायुः, पाप-जीवन इति यावत्। इन्द्रियारामः इन्द्रियैराराम आरमणमाक्रीडा विषयेषु यस्य स इन्द्रियारामो मोघं वृथा हे पार्थ स जीवति। तस्मादज्ञेनाधिकृतेन कर्त्तव्यमेव कर्मेति प्रकरणार्थः।।

प्रागात्म-ज्ञान-निष्ठा-योग्यता-प्राप्तेः तादर्थ्येन कर्मयोगानुष्ठानमधिकृतेनानात्मज्ञेन कर्त्तव्यमेव इत्येतत् न कर्मणामनारम्भात्(गी ३.४) इत्यत आरभ्य शरीर-यात्रापि च ते न प्रसिद्ध्येदकर्मणः (गी ३.८)

इत्येवमन्तेन प्रतिपाद्य यज्ञार्थात् कर्मणोऽन्यत्र (गी ३.९) इत्यादिना मोघं पार्थ स जीवति (गी ३.१६)

इत्येवमन्तेनापि ग्रन्थेन प्रासङ्गिकम् अधिकृतस्यानात्मविदः कर्मानुष्ठाने बहु-कारणमुक्तं, तदकरणे च

दोष-सङ्कीर्तनं कृतम्।। १६ ।।

एवं स्थिते किमेवं प्रवर्त्तितं चक्रं सर्वेण अनुवर्त्तनीयम् आहोस्वित् पूर्वोक्तकर्मयोगानुष्ठानोपाय-प्राप्यामनात्मविदा ज्ञानयोगेन एव निष्ठाम् आत्मविद्भिः सांख्यैः अनुष्ठेयाम् अप्राप्तेन एव इत्येवमर्थम् अर्जुनस्य प्रश्नमाशङ्क्य स्वयमेव वा शास्त्रार्थस्य विवेकप्रतिपत्त्यर्थमेव तं वा एतमात्मानं[16] विदित्वा निवृत्तमिथ्याज्ञानाः[17] सन्तः ब्राह्मणाः मिथ्याज्ञानवद्भिः अवश्यं कर्त्तव्येभ्यः पुत्रैषणादिभ्यः व्युत्थाय भिक्षाचर्यं शरीरस्थितिमात्रप्रयुक्तं चरन्ति न तेषां आत्मज्ञाननिष्ठाव्यतिरेकेण अन्यत्कार्यमस्ति इत्येवं श्रुत्यर्थमिह गीताशास्त्रे प्रतिपादयिषितम्[18] आविष्कुर्वन्नाह -

**यस्त्वात्मरतिरेव स्याद् आत्मतृप्तश्च मानवः।**

**आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते।। १७।।**

---

[16] प्रतिपत्त्यर्थम् एतं वै तमात्मानमिति पाठान्तरम्।

[17] giving reality to the world is mithya jnanam. One who is free from that.

[18] प्रतिपिपादयिषितमिति वा।

यः मानवः तु आत्मरतिः एव स्याद् आत्मत्तृप्तः (स्याद्) आत्मनि एव च संतुष्टः च(स्याद्) तस्य कार्यं न विद्यते।।

यस्त्विति। यस्तु सांख्य आत्म-ज्ञान-निष्ठः आत्मरतिः आत्मन्येव रतिर्न विषयेषु यस्य स आत्म-

रतिः एव स्याद् भवेत्।

आत्मतृप्तश्च आत्मनैव तृप्तो नान्न-रसादिना। मानवः मनुष्यः संन्यासी।

आत्मन्येव च सन्तुष्टः संतोषो हि बाह्यार्थ-लाभे सर्वस्य भवति, तमनपेक्ष्यात्मन्येव च सन्तुष्टः, सर्वतो

वीत-तृष्ण इत्येतत्। य ईदृश आत्म-वित् तस्य कार्यं करणीयं न विद्यते नास्तीत्यर्थः।। १७ ।।

किंच -

**नैव तस्य कृतेनार्थः नाकृतेनेह कश्चन।**

**न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः।। १८।।**

तस्य इह कृतेन कश्चन अर्थः नैव । अकृतेन न (एव कश्चन अर्थः) । अस्य सर्वभूतेषु अर्थव्यपाश्रयः कश्चिद् न ।।

नैवेति। नैव तस्य परमात्म-रतेः कृतेन कर्मणा अर्थः प्रयोजनमस्ति। अस्तु तर्हि अकृतेनाकरणेन प्रत्यवायाख्योऽनर्थः। न, अकृतेन इह लोके कश्चन कश्चिदपि प्रत्यवाय-प्राप्ति-रूप आत्म-हानि-लक्षणो वा न एवास्ति। न चास्य सर्वभूतेषु ब्रह्मादि-स्थावरान्तेषु भूतेषु कश्चिदर्थव्यपाश्रयः प्रयोजन-निमित्त-क्रिया-साध्यो व्यपाश्रयो व्यपाश्रयणम्। कञ्चिद् भूत-विशेषमाश्रित्य न साध्यः कश्चिदर्थोऽस्ति येन तदर्था क्रियाऽनुष्ठेया स्यात्। न त्वम् एतस्मिन् सर्वतः सम्प्लुदोदक-स्थानीये सम्यग्दर्शने वर्त्तसे।।

१८ ।।

**तस्मादसक्तः सततं कार्यं कर्म समाचर।**

**असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः।। १९।।**

तस्माद् असक्तः (सन्) सततं कार्यं कर्म समाचर। पूरुषः असक्तः हि कर्म आचरन् परम् आप्नोति।

तस्मादिति। तस्माद् असक्तः सङ्ग-वर्जितः सततं सर्वदा कार्यं कर्त्तव्यं नित्यं कर्म समाचर निर्वर्त्तय।

असक्तो हि यस्मात् सम्-आचरन् ईश्वरार्थं कर्म कुर्वन् परं मोक्षम् आप्नोति पुरुषः सत्त्व-शुद्धि-

द्वारेणेत्यर्थः।। १९ ।।

यस्माच्च -

**कर्मणैव हि संसिद्धिं आस्थिता जनकादयः।**

**लोकसङ्ग्रहमेवापि सम्पश्यन् कर्त्तुमर्हसि।। २०।।**

जनकादयः कर्मणा एव हि संसिद्धिं आस्थिताः । लोकसंग्रहम् संपश्यन् अपि कर्त्तुम् एव अर्हसि।।

कर्मणैवेति। कर्मणैव हि यस्मात् पूर्वे च क्षत्रिया विद्वांसः संसिद्धिं मोक्षं गन्तुम् आस्थिताः प्रवृत्ताः।

के जनकादयः जनकाश्वपति-प्रभृतयः।

यदि ते प्राप्त-सम्यग्दर्शनाः ततो लोकसङ्ग्रहार्थं प्रारब्ध-कर्म-बलात् कर्मणा सहैव, असंन्यस्यैव कर्म,

संसिद्धिम् आस्थिता इत्यर्थः। अथ अप्राप्त-सम्यग्दर्शनाः जनकादयः तदा कर्मणा सत्त्व-शुद्धि-साधन-

भूतेन क्रमेण संसिद्धिम् आस्थिता इति व्याख्येयः श्लोकः।

अथ मन्यसे पूर्वैरपि जनकादिभिरप्यजानद्भिरेव कर्त्तव्यं कर्म कृतम्।

तावता नावश्यमन्येन कर्त्तव्यं सम्यग्दर्शनवता कृतार्थेन इति, तथापि प्रारब्ध-कर्मायत्तः त्वं

लोकसङ्ग्रहमेवापि लोकस्य उन्मार्ग-प्रवृत्ति-निवारणं लोक-सङ्ग्रहः तमेवापि प्रयोजनं संपश्यन्

कर्त्तुमर्हसि।। २० ।।

लोकसंग्रहः किमर्थं कर्त्तव्य इति उच्यते -

**यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।**

**स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते।। २१।।**

श्रेष्ठः यद्यद् आचरति इतरो जनः तत्तद् एव (आचरति) । स यत् प्रमाणं कुरुते लोकः तद् अनुवर्त्तते।।

यद्यदिति। यद्यत् कर्म आचरति करोति श्रेष्ठः[19] प्रधानः तत्तदेव कर्म आचरति इतरः अन्यः जनः

तदनुगतः।

किञ्च स श्रेष्ठो यत्प्रामाणं कुरुते लौकिकं वैदिकं वा लोकस्तदनुवर्त्तते तदेव प्रमाणी करोतीत्यर्थः।।

२१ ।।

[19] येषु येषु श्रेष्ठः इति पाठान्तरम्।

यद्यत्र ते लोक-सङ्ग्रह-कर्त्तव्यतायां विप्रतिपत्तिः तर्हि मां किन्न पश्यसि -

**न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चन।**

**नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि।। २२।।**

पार्थ मे कर्तव्यम् न अस्ति त्रिषु लोकेषु अनवाप्तम् अवाप्तव्यम् किञ्चन न च कर्मणि एव वर्ते पार्थ मे त्रिषु लोकेषु किंचन कर्त्तव्यं न अस्ति । न अनवाप्तम् अवाप्तव्यं च (किंचन मे नास्ति) । कर्मणि एव वर्ते ।।

न मे इति। न मे मम पार्थास्ति न विद्यते कर्त्तव्यं त्रिषु अपि लोकेषु किञ्चन किञ्चिदपि।

कस्मात् न अनवाप्तम् अप्राप्तं अवाप्तव्यं प्रापणीयम्। तथापि वर्त्ते एव च कर्मणि अहम्।। २२ ।।

**धर्मयदि ह्यहं न वर्त्तेयं जातु कर्मण्यतन्द्रितः।**

**मम वर्त्माऽनुवर्त्तन्ते मनुष्याः पार्थ सर्वशः।। २३।।**

यदि हि अहं अतन्द्रितः (सन्) कर्मणि जातु न वर्त्तेयं पार्थ मनुष्याः सर्वशः मम वर्त्म अनुवर्त्तन्ते ।

यदीति। यदि हि पुनः अहं न वर्त्तेय जातु कदाचित् कर्मणि अतन्द्रितः अनलसः सन् मम श्रेष्ठस्य

सतो वर्त्म मार्गम् अनुवर्त्तन्ते मनुष्याः हे पार्थ सर्वशः सर्व-प्रकारैः।। २३।।

तथा च को दोषः इत्याह -

**उत्सीदेयुरिमे लोकाः न कुर्यां कर्म चेदहम्।**

**सङ्करस्य च कर्त्ता स्याम् उपहन्यामिमाः प्रजाः।। २४।।**

अहम् कर्म न कुर्याम् चेत् इमे लोकाः उत्सीदेयुः च सङ्करस्य कर्ता स्याम् इमाः प्रजाः उपहन्याम् अहम् कर्म न कुर्यां चेद् इमे लोकाः उत्सीदेयुः। सङ्करस्य च कर्त्ता स्याम् । इमाः प्रजाः उपहन्याम् ।।

उत्सीदेयुरिति। उत्सीदेयुः विनश्येयुः इमे सर्वे लोकाः लोक-स्थिति-निमित्तस्य कर्मणोऽभावात् न कुर्यां कर्म चेदहम्। किञ्च सङ्करस्य च कर्त्ता स्याम्। तेन कारणेन उपहन्यामिमाः प्रजाः। प्रजानामनुग्रहाय प्रवृत्त उपहतिमुपहननं कुर्यामित्यर्थः। ममेश्वरस्य अनुरूपमापद्येत।। २४ ।।

यदि पुनः अहमिव त्वं च कृतार्थबुद्धिः आत्मविद् अन्यः वा तस्यापि आत्मनः कर्तव्याभावे अपि

परानुग्रह एव कर्त्तव्यइति आह -

**सक्ताः कर्मण्यविद्वांसः यथा कुर्वन्ति भारत।**

**कुर्याद् विद्वान् तथाऽसक्तः चिकीर्षुर्लोकसङ्ग्रहम्।। २५।।**

भारत अविद्वांसः कर्मणि सक्ताः (सन्तः) यथा (कर्म) कुर्वन्ति । तथा विद्वान् असक्तः (सन्) लोकसंग्रहम् चिकीर्षुः (कर्म) कुर्याद्।

सक्ता इति। सक्ताः कर्मणि अस्य कर्मणः फलं मम भविष्यति इति केचिद् अविद्वांसः यथा कुर्वन्ति

भारत कुर्याद् विद्वान् आत्मवित् तथाऽसक्तः सन्। तद्वत् किमर्थं करोतीति तच्छृणु।

चिकीर्षुः कर्त्तुमिच्छुः लोकसङ्ग्रहम्।। २५ ।।

एवं लोकसंग्रहं चिकीर्षोः मम आत्मविदः न कर्त्तव्यम् अस्ति अन्यस्य वा, लोकसंग्रहं मुक्त्वा, ततः

तस्य आत्मविदः इदमुपदिश्यते -

**न बुद्धिभेदं जनयेद् अज्ञानां कर्मसङ्गिनाम्।**

**जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन्। २६।।**

विद्वान् कर्मसङ्गिनाम् अज्ञानां बुद्धिभेदं न जनयेत् । (विद्वान्) युक्तः समाचरन् (सन्) सर्वकर्माणि जोषयेत् ।

नेति। बुद्धेर्भेदो बुद्धि-भेदो मयेदं कर्त्तव्यं, भोक्तव्यं चास्य कर्मणः फलम् इति निश्चित-रूपाया बुद्धेर्भेदनं चालनं बुद्धि-भेदः तं बुद्धिभेदं न जनयेद् नोत्पादयेद् अज्ञानाम् अविवेकिनां कर्मसङ्गिनां कर्मण्यासक्तानामासङ्गवताम्। किन्तु कुर्याद् जोषयेत् कारयेत् सर्वकर्माणि विद्वान् स्वयं तदेवाविदुषां कर्म युक्तः अभियुक्तः समाचरन्।। २६ ।।

अविद्वान् अज्ञः कथं कर्मसु सज्जते इत्याह -

**प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।**

**अहङ्कराविमूढात्मा कर्ताऽहमिति मन्यते।। २७।।**

सर्वशः प्रकृतेः गुणैः क्रियमाणानि कर्माणि अहङ्कराविमूढात्मा अहम् कर्ता इति मन्यते।।

प्रकृतेरिति। प्रकृतेः प्रकृतिः प्रधानं सत्त्व-रजस्-तमसां गुणानां साम्यावस्था, तस्याः प्रकृतेः गुणैः विकारैः कार्य-करण-रूपैः क्रियमाणानि कर्माणि लौकिकानि शास्त्रीयाणि च सर्वशः सर्वप्रकारैः। अहङ्कारविमूढात्मा कार्य-करण-संघाते आत्म-प्रत्ययोऽहङ्कारः, तेन विविधं नाना-विधं मूढ आत्मान्तःकरणं यस्य सोऽयं कार्य-करण-धर्मा कार्य-करणाभिमानी अविद्यया कर्माण्यात्मनि मन्यमानः तत्तत्कर्मणाम् अहं कर्तेति मन्यते।। २७ ।।

यः पुनः विद्वान् -

**तत्ववित्तु महाबाहो गुणकर्मविभागयोः।**

**गुणा गुणेषु वर्त्तन्ते इति मत्वा न सज्ज्ते।। २८।।**

महाबाहो गुणकर्मविभागयोः तत्ववित् तु गुणा गुणेषु वर्त्तन्ते इति मत्वा न सज्ज्ते।। २८

तत्वविदिति। तत्त्ववित्तु महाबाहो। कस्य तत्त्व-विद् गुणकर्मविभागयोः गुण-विभागस्य कर्म-विभागस्य च तत्त्वविदित्यर्थः।

गुणाः करणात्मकाः गुणेषु विषयात्मकेषु वर्त्तन्ते नात्मा इति मत्वा न सज्ज्ते सक्तिं न करोति।। २८ ।।

ये पुनः -

**प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु।**

**तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्।। २९।।**

प्रकृतेः गुणसंमूढाः गुणकर्मसु सज्जन्ते । कृत्स्नविद् तान् मन्दान् अकृत्स्नविदः न विचालयेत्।। २९

प्रकृतेरिति। प्रकृतेः गुणैः सम्यङ् मूढाः सम्मोहिताः सन्तः सज्जन्ते गुणानां कर्मसु गुणकर्मसु वयं

कर्म कुर्मः फलाय इति।

तान् कर्म-सङ्गिनः अकृत्स्नविदः कर्म-फल-मात्र-दर्शिनो मन्दान् मन्द-प्रज्ञान् कृत्स्नविद् आत्मवित्

स्वयं न विचालयेत्।

बुद्धि-भेद-करणमेव चालनं, तन्न कुर्यादित्यर्थः।। २९ ।।

कथं पुनः कर्मण्यधिकृतेन अज्ञेन मुमुक्षुणा कर्म कर्त्तव्यम् इति। उच्यते -

**मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।**

**निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः।। ३०।।**

(त्वम्) अध्यात्मचेतसा विगतज्वरः (सन्) सर्वाणि कर्माणि मयि संन्यस्य निराशीः निर्ममः भूत्वा युध्यस्व ।। ३०

मयीति। मयि वासुदेवे परमेश्वरे सर्वज्ञे सर्वात्मनि सर्वाणि कर्माणि संन्यस्य निक्षिप्य अध्यात्मचेतसा

विवेक-बुद्ध्या, अहं कर्त्ता, ईश्वराय भृत्यवत् करोमि इत्यनया बुद्ध्या।

किञ्च निराशीः त्यक्ताशीः निर्ममः मम-भावश्च निर्गतो यस्य तव स त्वं निर्ममो भूत्वा युध्यस्व

विगतज्वरः विगत-सन्तापो विगत-शोकः सन्नित्यर्थः।। ३० ।।

यदेतन्मम मतं कर्म कर्त्तव्यमिति सप्रमाणम् उक्तं तत् तथा -

**ये मे मतमिदं नित्यम् अनुतिष्ठन्ति मानवाः।**

**श्रद्धावन्तो अनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः।। ३१।।**

ये मानवाः श्रद्धावन्तः अनसूयन्तः (सन्तः) मे इदं मतम् नित्यम् अनुतिष्ठन्ति ते अपि कर्मभिः मुच्यन्ते ।।३१

ये मे इति। ये मे मदीयम् इदं मतं नित्यम् अनुतिष्ठन्ति अनुवर्त्तन्ते मानवाः मनुष्याः श्रद्धावन्तः श्रद्दधाना अनसूयन्तः असूयां च मयि परम-गुरौ वासुदेवेऽकुर्वन्तो मुच्यन्ते तेऽपि एवं-भूताः कर्मभिः धर्माधर्माख्यैः।। ३१ ।।

**ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्।**

**सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः।। ३२।।**

ये तु एतत् अभ्यसूयन्तः मे मतम् न अनुतिष्ठन्ति सर्वज्ञानविमूढान् तान् अचेतसः नष्टान् विद्धि ।। ३२

ये त्विति। ये तु तद्विपरीता एतद् मम मतम् अभ्यसूयन्तः निन्दन्तो नानुतिष्ठन्ति न अनुवर्त्तन्ते मे मतं सर्वेषु ज्ञानेषु विविधं मूढाः ते, सर्वज्ञानविमूढान् तान् विद्धि नष्टान् नाशं गतान् अचेतसः अविवेकिनः।। ३२ ।।

कस्मात्पुनः कारणात् त्वदीयं मतं नानुतिष्ठन्ति, पर-धर्माननुतिष्ठन्ति, स्वधर्मं च नानुवर्त्तन्ते, त्वत्प्रतिकूलाः कथं न बिभ्यति त्वच्छासनातिक्रमदोषात् तत्राह -

**सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।**

**प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति।। ३३।।**

सर्वः जन्तुः स्वस्याः प्रकृतेः सदृशं चेष्टते । ज्ञानवानपि (स्वस्याः प्रकृतेः सदृशं चेष्टते) । भूतानि प्रकृतिं यान्ति। निग्रहः किं करिष्यति।

सदृशमिति। सदृशम् अनुरूपं चेष्टते। कस्यः स्वस्याः स्वकीयायाः प्रकृतेः। प्रकृतिर्नाम पूर्वकृत-धर्माधर्मादि-संस्कारो वर्त्तमान-जन्मादावभिव्यक्तः सा प्रकृतिः, तस्याः सदृशमेव सर्वो जन्तुः ज्ञानवानपि चेष्टते। किं पुनर्मूर्खः। तस्मात् प्रकृतिं यान्ति अनुगच्छन्ति भूतानि। निग्रहः निषेध-रूपः किं करिष्यति मम वान्यस्य वा[20] ।। ३३ ।।

[20] दुर्निग्रहा प्रकृतिरिति वाक्यशेषः इत्यधिकपाठः।

यदि सर्वः जन्तुः आत्मनः प्रकृतिसदृशमेव चेष्टते न च प्रकृतिशून्यः कश्चिदस्ति ततः पुरुषकारस्य विषयानुपपत्तेः शास्त्रानर्थक्यप्राप्तौ इदमुच्यते -

**इन्द्रियस्येन्द्रियस्यार्थे रागद्वोषौ व्यवस्थितौ ।**

**तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ।। ३४।।**

इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वोषौ व्यवस्थितौ । तयोः वशम् न आगच्छेत् । तौ हि अस्य परिपन्थिनौ।। ३४

इन्द्रियस्येति। इन्द्रियस्येन्द्रियस्यार्थे सर्वेन्द्रियाणामर्थे शब्दादि-विषये इष्टे रागोऽनिष्टे द्वेष इत्येवं प्रतीन्द्रियार्थे रागद्वेषौ अवश्यं-भाविनौ। तत्रायं पुरुष-कारस्य शास्त्रार्थस्य च विषय उच्यते। शास्त्रार्थे प्रवृत्तः पूर्वमेव रागद्वेषयोर्वशं नागच्छेत्।

या हि पुरुषस्य प्रकृतिः सा रागद्वेष-पुरःसरैव[21] स्वकार्ये पुरुषं प्रवर्त्तयति तदा स्वधर्म-परित्यागः

परधर्मानुष्ठानं च भवति।

यदा पुना रागद्वेषौ तत्प्रतिपक्षेण नियमयति तदा शास्त्र-दृष्टिरेव पुरुषो भवति, न प्रकृति-वशः।

तस्मात् तयोः राग-द्वेषयोः वशं नागच्छेत्।

यतः तौ ह्यस्य पुरुषस्य परिपन्थिनौ श्रेयोमार्गस्य विघ्न-कर्त्तारौ तस्करावेिव पथीत्यर्थः।। ३४ ।।

[21] प्रकृतेः विषयेषु रागद्वेषजननमात्र एव सामर्थ्यम्। कार्ये प्रवर्त्तकत्वं तु रागद्वेषयोरेव। क्षुद्रो हि राजकन्यां दृष्ट्वा तत्र रागं प्रपद्यापि विमृश्य तद्रागमेव जहाति, न तु तत्प्राप्त्यर्थं यतते। ततश्च प्रकृतिसम्भवस्यापि रागस्य पुरुषकारेण विमर्शरूपेण निवृत्तिर्दृश्यते।

तत्र रागद्वेषप्रयुक्तः मन्यते शास्त्रार्थमपि अन्यथा, परधर्मः अपि धर्मत्वाद् अनुष्ठेय एव इति तदसत् -

**श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।**

**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।। ३५।।**

विगुणः स्वधर्मः स्वनुष्ठितात् परधर्मात् श्रेयान् । स्वधर्मे निधनं श्रेयः । परधर्मो भयावहः।।

श्रेयानिति। श्रेयान् प्रशस्यतरः स्वो धर्मः स्वधर्मो विगुणः अपि विगत-गुणोऽपि अनुष्ठीयमानः

परधर्मात् स्वनुष्ठितात् साद्गुण्येन संपादितादपि।

स्वधर्मे स्थितस्य निधनं मरणमपि श्रेयः पर-धर्मे स्थितस्य जीवितात्। कस्मात् परधर्मो भयावहः।

नरकादि-लक्षणं भयमावहति यतः।। ३५ ।।

यद्यप्यनर्थ-मूलं ध्यायतो विषयान् पुंसः(गी २.६२), रागद्वेषौ ह्यस्य परिपन्थिनौ(गी ३.३४), इति च

उक्तं विक्षिप्तम् अनवधारितं च तदुक्तम् । तत्संक्षिप्तं निश्चितं च इदमेव इति ज्ञातुमिच्छन् अर्जुन

उवाच - ज्ञाते हि तस्मिन् तदुच्छेदाय यत्नं कुर्यामिति -

**अर्जुन उवाच**

**अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।**

**अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः।। ३६।।**

अथ वार्ष्णेय अनिच्छन्नपि अयं पूरुषः केन प्रयुक्तः (सन्) बलाद् नियोजितः इव पापं चरति ।

अथेति। अथ केन हेतु-भूतेन प्रयुक्तः सन् राज्ञेव भृत्यः अयं पापं कर्म चरति आचरति पूरुषः

स्वयम् अनिच्छन्नपि हे वार्ष्णेय वृष्णि-कुल-प्रसूत। बलादिव नियोजितः राज्ञेवेत्युक्तो दृष्टान्तः।। ३६।।

श्रृणु त्वं तं वैरिणं सर्वानर्थकरं यं त्वं पृच्छसि -

**श्रीभगवानुवाच**

"ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरणा"।।

ऐश्वर्यादिषट्कं यस्मिन् वासुदेवे नित्यमप्रतिबद्धत्वेन सामस्त्येन च वर्त्तते[22]

"उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति"।

उत्पत्यादिविषयं च विज्ञानं यस्य स वासुदेवः वाच्यः भगवानिति।

**काम एष क्रोध एष रजोगुणसमुद्भवः।**

**महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्।। ३७।।**

रजोगुणसमुद्भवः एषः कामः एषः क्रोधः महाशनो महापाप्मा (भवति) एनम् इह वैरिणं विद्धि ।। ३७

---

[22] Everyone has all these bhagas in small measure. I know each one of them. We know our vairagya towards garbage. We know our rulership towards ants.

काम इति। काम एष सर्व-लोक-शत्रुर्यन्निमित्ता सर्वानर्थ-प्राप्तिः प्राणिनाम्।

स एष कामः प्रतिहतः केनचित् क्रोधत्वेन परिणमते। अतः क्रोधः अपि एषः एव।

रजोगुणसमुद्भवः रजश्च तद्गुणश्च रजोगुणः, स समुद्भवो यस्य स कामो रजोगुण-समुद्भवः।

रजोगुणस्य वा समुद्भवः। कामो ह्युद्भूतो रजः प्रवर्त्तयन् पुरुषं प्रवर्त्तयति।

तृष्णयाऽहम् कारितः इति दुःखितानां रजःकार्ये सेवादौ[23] प्रवृत्तानां प्रलापः श्रूयते।

महाशनः महदशनमस्येति महाशनः। अत एव महापाप्मा कामेन हि प्रेरितो जन्तुः पापं करोति।

अतो विद्ध्येनं कामम् इह संसारे वैरिणम्।। ३७ ।।

[23] राजसेवादौ।

कथं वैरिः इति दृष्टान्तैः प्रत्याययति -

**धूमेनाव्रियते वह्निः यथाऽऽदर्शो मलेन च।**

**यथोल्बेनावृतो गर्भः तथा तेनेदमावृतम्।। ३८।।**

यथा धूमेन वह्निः आव्रियते (यथा) आदर्शः च मलेन (आव्रियते)। यथा गर्भः उल्बेन आवृतः तथा इदम् तेन आवृतम्।। ३८

धूमेनेति। धूमेन सहजेन आव्रियते वह्निः प्रकाशात्मकोऽप्रकाशात्मकेन यथा वा आदर्शो मलेन च।

यथा उल्बेन च गर्भ-वेष्टनेन जरायुणा आवृतः आच्छादितः गर्भः, तथा तेन इदम् आवृतम्।। ३८ ।।

किं पुनस्तद् इदंशब्दवाच्यं यत् कामेन आवृतमित्युच्यते -

**आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।**

**कामरूपेण कौन्तेय दुष्पूरेणानलेन च।। ३९।।**

कौन्तेय ज्ञानिनः नित्यवैरिणा दुष्पूरेण अनलेन च कामरूपेण एतेन ज्ञानम् आवृतम् ।। ३९

आवृतमिति। आवृतम् एतेन ज्ञानं ज्ञानिनो नित्यवैरिणा। ज्ञानी हि जानात्यनेनाहमनर्थे प्रयुक्तः पूर्वमेवेति[24]। दुःखी च भवति नित्यमेव। अतोऽसौ ज्ञानिनो नित्यवैरी, न तु मूर्खस्य। स हि कामं तृष्णा-काले मित्रमिव पश्यंस्तत्कार्ये दुःखे प्राप्ते जानाति तृष्णयाऽहं दुःखित्वमापादितः इति, न पुर्वमेव। अतोऽसौ ज्ञानिन एव नित्यवैरी। किंरूपेण कामरूपेण कामः इच्छैव रूपमस्येति काम-रूपः तेन। दुष्पूरेण दुःखेन पूरणमस्येति दुष्पूरः तेन अनलेन नास्यालं पर्याप्तिर्विद्यत इत्यनलः तेन च।। ३९ ।।

[24] दुःखात्पूर्वमेव, तृष्णाकाले इति यावत्।

किमधिष्ठानः पुनः कामः ज्ञानस्य आनरणत्वेन वैरी सर्वस्य इत्यपेक्षायाम् आह।

ज्ञाते हि शत्रोः अधिष्ठाने सुखेन शत्रुनिबर्हणं कर्त्तुं शक्यते इति -

**इन्द्रियाणि मनो बुद्धिः अस्याधिष्ठानमुच्यते।**

**एतैर्विमोहयत्येषः ज्ञानमावृत्य देहिनम्।। ४०।।**

अस्य इन्द्रियाणि मनः बुद्धिः अधिष्ठानम् उच्यते। एषः (कामः) एतैः ज्ञानम् आवृत्य देहिनम् विमोहयति ।। ४०

इन्द्रियाणीति। इन्द्रियाणि मनो बुद्धिः च अस्य कामस्य अधिष्ठानम् आश्रय उच्यते।

एतैः इन्द्रियादिभिराश्रयैः विमोहयति विविधं मोहयति एषः कामः ज्ञानमावृत्य आच्छाद्य देहिनं

शरीरिणम्।। ४० ।।

यत एवं -

**तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।**

**पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।। ४१।।**

तस्मात् हे भरतर्षभ त्वम् आदौ इन्द्रियाणि नियम्य ज्ञानविज्ञाननाशनम् पाप्मानं एनं प्रजहिहि ।। ४१

तस्मादिति। तस्मात् त्वम् इन्द्रियाण्यादौ पूर्वमेव नियम्य वशीकृत्य भरतर्षभ पाप्मानं पापाचारं कामं प्रजहिहि परित्यज एनं प्रकृतं वैरिणं ज्ञानविज्ञाननाशनं ज्ञानं शास्त्रत आचार्यतश्चात्मादीनामवबोधः। विज्ञानं विशेषतः तदनुभवः। तयोर्ज्ञान-विज्ञानयोः श्रेयः-प्राप्ति-हेत्वोर्नाशनं नाश-करं प्रजहिहि[25], आत्मनः परित्यजेत्यर्थः।। ४१ ।।

[25] हा त्यागे। जहाहि, जहिहि, जहीहि इति त्रीणि रूपाणि।

इन्द्रियाण्यादौ नियम्य कामं शत्रुं जहीहि इत्युक्तम्। तत्र किमाश्रयः कामं जह्याद् इत्युच्यते -

**इन्द्रियाणि पराण्याहुः इन्द्रियेभ्यः परं मनः।**

**मनसस्तु परा बुद्धिः यो बुद्धेः परतस्तु सः।। ४२।।**

इन्द्रियाणि पराणि आहुः । इन्द्रियेभ्यः मनः परम् । मनसः तु बुद्धिः परा । यः (सर्वान्तरः) सः तु बुद्धेः परतः ।।

इन्द्रियाणीति। इन्द्रियाणि श्रोत्रादीनि पञ्च। देहं स्थूलं बाह्यं परिच्छिन्नं चापेक्ष्य सौक्ष्म्यान्तरस्थत्व-व्यापित्वाद्यपेक्षया पराणि प्रकृष्टानि आहुः पण्डिताः। तथा इन्द्रियेभ्यः परं मनः सङ्कल्प-विकल्पात्मकम्। तथा मनसस्तु परा बुद्धिः निश्चयात्मिका। तथा यः सर्व-दृश्येभ्यो बुद्ध्यन्तेभ्योऽभ्यन्तरो यं देहिनमिन्द्रियादिभिराश्रयैः युक्तः कामो ज्ञानावरण-द्वारेण मोहयति इत्युक्तं स बुद्धेः परतस्तु। स बुद्धेर्द्रष्टा पर आत्मा।। ४२ ।।

ततः किम् -

**एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।**

**जहि शत्रुं महाबाहो कामरूपं दुरासदम्।। ४३।।**

महाबाहो एवं बुद्धेः परम् आत्मानं बुद्ध्वा आत्मना संस्तभ्य कामरूपं दुरासदम् शत्रुं जहि ।। ४३

एवमिति। एवं बुद्धेः परम् आत्मानं बुद्ध्वा ज्ञात्वा संस्तभ्य सम्यक् स्तम्भनं कृत्वा स्वेन एव आत्मना संस्कृतेन सम्यक् समाधायेत्यर्थः। जहि एनं शत्रुं हे महाबाहो कामरूपं दुरासदम् दुःखेन आसदः आसदनं प्राप्तिर्यस्य तं दुरासदं दुर्विज्ञेयानेक-विशेषमिति।। ४३ ।।

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये तृतीयोऽध्यायः।।